Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 3, Issue - 4, July-Aug – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 29/07/2020 Accepted on : 15/08/2020 Publication Date: 31/08/2020

महाकविकालिदासदिशा जैवसंरक्षणम् : एकमध्ययनम्

DR. MENAKARANI SAHOO
Assistant Professor of Sanskrit, P.G. Department of Sanskrit
Shailabala Women's (Auto) College, Cuttack, Odisha, India
Email - sjnanashree@gmail.com

सार रूपः परितः आवृणोति आच्छादयतीति पर्यावरणम् । मानवस्य परितः वन-वृक्ष-सरित-पर्वत-आकाश-वायु-जल-पशुपक्षिप्रभृतयः पर्यावरणस्यावयवाः । पर्यावरणस्य निर्माणं भौतिक-जौविकतत्त्वानां मिश्रणेन भवति । भौतिकतत्त्वेषु मृत्तिका, जलं, वायुः प्रकाशश्च सन्ति । जौविकतत्त्वेषु समस्तं जीवजगद् वृक्षवनस्पतयश्च गृह्यन्ते । प्रकृतिः प्राणिनामवश्यकतापूर्तये पूर्णसौविध्यं यच्छति । प्रकृतिरेव फलम्, अन्नं, काष्ठं, वायुं, जलमित्येतानि संसाधनानि प्रयच्छति । सम्प्रति मानवः स्वस्वार्थपूर्तये प्रकृत्याः प्रदत्तसंसाधनानामत्यधिकं दोहनं करोति । अतः मानवः दन्तयोः कुञ्जरं, चर्मणि द्विपिनं, मांसार्थं मृगञ्च हन्ति । यथा आत्मानं विना कायस्य किमपि मूल्यं न तथैव मनुष्येतरप्राणिनं विना मनुष्यस्य किं वा मूल्यम् ? पशवः पक्षिणश्च प्रत्यक्षरुपेण परोक्षरुपेण वा मनुष्यहिताय कार्यं कुर्वन्ति । पशवः पक्षिणश्च मनुष्याय जीवनमूल्यस्योपदेशं ददति । बकः इन्द्रियाणि संयम्य देशकालबलं ज्ञात्वा सर्वकार्याणि साधयितुं शिक्षयति । कुक्कुटः प्रत्युत्थानम्, बन्धुषु संविभागम्, स्वयमाक्रम्य भुक्तमित्यादीनां शिक्षां ददाति । श्वानः बह्वाशी-स्वल्पसन्तुष्ट- सुनिद्र-लघुचेतन-स्वामिभक्तेत्यादीनां शिक्षां ददाति । वेदेषु, धर्मग्रन्थेषु, महाकाव्येषु, गद्यकाव्येषु, पद्यकाव्येषु च जैवसंरक्षणविषये तथ्यानि वर्णितानि । राजा दशरथः मृगयार्थं वनं गत्वा व्याधः इव बाणस्य प्रयोगं कृतवान् । तस्य कार्यस्य परिणामतः श्रवणकुमारस्य पिता तं शशाप । भगवान् श्रीरामोऽपि सीतायाः इच्छापूर्त्यर्थं मृगस्यानुधावनं कृतवान् परिणामतः सीताहरणमभवत् । राजा पाण्डुः मृगयार्थं शरस्य सन्धानं कृतवान् । तस्य परिणामतः किन्दममुनेः शापं प्राप्य विषयभोगास्वादनसमयैव मृत्युं प्राप्तवान् । अतः प्राणिनां हननं न कृत्वा तेषां संरक्षणं कर्तव्यमिति संस्कृतसाहित्यं शिक्षयति । महाकवेः कालिदासस्य रघुवंशमहाकाव्ये, कुमारसम्भवमहाकाव्ये, मेघदूते, अभिज्ञानशाकुन्तले च प्राणिनां संरक्षणविषये तथ्यं वर्णितमस्ति ।

मुख्य बिन्दुः जरायुजाः, सुरभिः, गोप्तरि, गृहबलिभुक्, प्रतिसंजहार ।

उपक्रमः

मनुस्मृतौ सृष्टिप्रक्रिया वर्णितास्ति यत्र प्राणिनां विभाजनं आचार्यमनुना कृतम् । अतः आचार्यमनुना प्रोक्तम्-

पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः ।

रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ।।

अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः ।

यानि चैवं प्रकाराणि स्थलजान्यौदकानि च ।।

स्वेदजं दंशमशकं यूकामक्षिकमक्रूणम् ।

ऊष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम् ।।[1]

१. जरायुजाः – पशवः, मृगाः, हिंस्रप्राणिनः, रक्षांसि, पिशाचाः, मनुष्याश्च जरायुजाः भवन्ति ।

२. अण्डजाः – पक्षिणः , सर्पाः, नक्राः मत्स्याः, कच्छपादयः अण्डजाः भवन्ति ।

३. स्वेदजाः – मशकः, यूकाः, मक्षिकम्, उष्मणादयः स्वेदजाः भवन्ति ।

एतेषु प्राणिषु मनुष्यः श्रेष्ठः भवति । यतः तस्य विवेकज्ञानं वर्ततैव । अतः सः यस्मिन् पर्यावरणे निवसति तस्य संरक्षणं तेनावश्यं करणीयम् । वायुमण्डले अम्लजान-अङ्गारकाम्लयोः सन्तुलनं जैवसंरक्षणेन जायते । अतः जैवसंरक्षणं मनुष्यैः करणीयम् ।

विश्वे भारतराष्ट्रं 'यज्ञियो देशः' नाम्ना विदितम् । यज्ञियदेशस्य परिचयं दत्त्वा आचार्यमनुना प्रोक्तम् –

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।

स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः ।।[2]

अर्थात् यत्र मृगः स्वेच्छया चरति सः देशः यज्ञियो देशः नाम्ना विदितः । परन्तु सम्प्रति प्राणिनः स्वेच्छयाभ्रमणं तेषां मृत्योः कारणं भवति । यतः मनुष्यः स्वस्वार्थसिद्धये तेषां हननं करोति ।

पुरा क्रौञ्चवधं दृष्ट्वा वाल्मीकेः शोकः श्लोकत्वेनागतः । अतः कालिदासेनोक्तम् –

तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः ।

निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ।।[3]

अस्य प्रमाणं उत्तररामचरितेऽपि प्राप्यते । यथा –

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।[4]

अतः यस्मिन् भारतवर्षे क्रौञ्चवधं दृष्ट्वा वाल्मीकेः शोकः आगतः तस्मिन् भारतवर्षे प्रतिदिनं प्राणिनां हननं मनुष्यैः क्रियते । यदि एवं भवति तर्हि पर्यावरणे विघटनमवश्यं जायते । मानवजीवने प्राणिनां योगदानं कथं वर्तते इति महाकविः कालिदासः तस्य काव्येषु चित्रितवान् ।

महाकविकालिदासदिशा जैवसंरक्षणम्

प्रकृतिः प्राणिनां दृष्टान्तमाध्यमेन पर्यावरणसंरक्षणस्य शिक्षां मनुष्येभ्यः यच्छति । अतः मुण्डकोपनिषद्युक्तमस्ति–

द्वा सुपर्णा सयुजा सखाया

समानं वृक्षं परिषस्वजाते

तयोरन्यः पिप्पलं स्वाद्वत्त्य –

नश्नन्नन्यो अभिचाकशीति ।।[5]

'Literature is the mirror of society' इति न्यायेन काव्यसाहित्यं मनुष्याय कर्तव्याकर्तव्यज्ञानं शिक्षयति । अतः भास-कालिदास-भारवि-माघ-बाणभट्ट-श्रीहर्षप्रभृतयः कवयः तेषां काव्येषु पर्यावरणसंरक्षणविषयकतथ्यानामुपस्थापनं कृतवन्तः । वस्तुतः जैवसंरक्षणं कथं करणीयम्? इति कालिदासेन महता प्रयत्नेन तस्य काव्येषु निर्दिश्यते ।

रघुवंशमहाकाव्ये जैवसंरक्षणम्

रघुवंशस्य प्रथमसर्गे राजा दिलीपः अपुत्रिकस्य कारणं ज्ञातुं महर्षेः वसिष्ठस्य समीपे गतवान् । तदा वसिष्ठः ध्यानेन राज्ञः दिलीपस्य सन्तानप्रतिबन्धनस्य कारणं ज्ञातवान् । अतः वसिष्ठेन प्रोक्तम् –

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।

आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ।।[6]

अपिच-

धर्मलोपभयाद्राज्ञोमृतुस्नातामिमां स्मरन् ।

प्रदक्षिणक्रियाऽर्हायां तस्यां त्वं साधु नाचर ।।[7]

स्वर्गात् भुवं प्रति आगमनकाले दिलीपः कल्पतरुच्छायामाश्रितां कामधेनोः प्रदक्षिणं न कृत्वा आगतवान् । अतः सा 'यस्मातत् माम् अवजानासि अतः मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यति' इति दिलीपं शशाप । यथोक्तं रघुवंशे –

अवजानासि मां यस्मादतस्ते न भविष्यति ।

मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ।।[8]

कामधेनोः अनादरस्य फलं दिलीपः प्राप्तवान् । अतः सः पुत्रहीनः आसीत् । अतः कालिदासेन प्रोक्तम् –

ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ।

प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।।[9]

ततः परं राजा दिलीपः वसिष्ठस्य परामर्शानुसारं कामधेनोः नन्दिन्याः सेवां कृतवान् । सः प्रत्यह गोचारणनिमित्तं वनं गतवान् । तस्याः सुरक्षा सेवा च दिलीपस्य धर्मः । अतः कालिदासेन प्रोक्तम् –

निवर्त्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।

पयोधरीभूतचतुःसमुद्रां जुगोप गोरुपधरामिवोर्वीम् ।।[10]

रघुवंशस्य द्वितीयसर्गे यदा कुम्भोदरः नन्दिन्याः उपरि आक्रमणं कृतवान् तदा राज्ञा दिलीपेन विनम्रेण प्रोक्तम् –

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद ।

दानावसानोत्सुकबालवत्सां विसृज्यतां धेनुरियं महर्षेः ।।[11]

अर्थात् 'भो कुम्भोदर ! महर्षेः धेनुं त्यक्त्वा मम देहेन त्वं शरीरस्य जीवनं सम्पादयितुं प्रसीद' ।

रघुवंशस्य नवमसर्गे राजा दशरथः हरिण्याः हरिणं प्रति प्रेम दृष्ट्वा करुणार्द्रचित्तः सन् आत्मनः बाणं प्रतिसंजहार । अतः कालिदासेनोक्तम् –

लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः

प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम् ।

आकर्णकृष्टमपि कामितया स धन्वी

बाणं कृपामृदुमनाः प्रतिसंजहार ।।[12]

अपिच-

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः

कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ।

त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः

प्रौढप्रियानयनविभ्रमचेष्टितानि ।।[13]

दुष्टप्राणिभ्यः शिष्टप्राणिनां रक्षणार्थं रघुवंशस्य राजानः सदा प्रयत्नशीलाः आसन् । अतः राजा दशरथः गजकुलवद्धतीव्रवैरान् कुटिलनखाग्रलग्नमुक्तान् सिंहान् हत्वा आत्मानं रणेषु कृतोपकाराणां गजानामानृण्यं शरैः प्राप्तवन्तमिव मेने । यथोक्तं रघुवंशे-

तान्हत्वा गजकुलबद्धतीव्रवैरान्काकुस्थः कुटिलनखाग्रलग्नमुक्तान् ।

आत्मानं रणकृतकर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त ।।[14]

गर्दभ-अश्व-उष्ट्र-मृग-हस्ती-छाग-मेष-मत्स्य-सर्प-महिषप्रभृतीनां हनने सङ्करीकरणं महापातकं भवति । अतः मनुना प्रोक्तम् –

खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ।

सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च ।।[15]

रघुवंशे राजा दशरथः आखेटं कृतवान् । आखेटस्य परिणामतः श्रवणकुमारस्य पिता तं शशाप । यथोक्तं रघुवंशे -

दिष्टान्तमाप्स्यति भवानपि पुत्रशोका –

दन्त्ये वयस्यहमिवेति तमुक्तवन्तम् ।

आक्रान्तपूर्वमिव मुक्तविषं भुजङ्ग

प्रोवाच कोसलपतिः प्रथमापराद्धः ।।[16]

अतः यः मनुष्यः स्वसुखाय भूतानि हन्ति सः कदापि सुखं न लभते । अतः मनुना प्रोक्तम् –

योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया ।

स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते ।।[17]

अतिथेः राज्याभिषेकादनन्तरं अतिथिः बलीवर्दादीनां भारमुक्तं कर्तुं वत्सानां पानार्थं गवामदोहनार्थमादिष्टवान् । अतः कालिदासेन प्रोक्तम् –

बन्धच्छेदं स वद्धानां वधार्हाणामवध्यताम् ।

धुर्याणां च धुरो मोक्षमदोहं चादिशद् गवाम् ।।[18]

राज्ञः अतिथेः आदेशानुसारं क्रीडापतत्त्रिणः पञ्जरस्थाः शुकशारिकादयः लब्धमोक्षाः सन्तः स्वेच्छाचारिणोऽभवन् । यथोक्तं रघुवंशे –

क्रीडापतत्त्रिणोऽप्यस्य पञ्जरस्थाः शुकादयः ।

लब्धमोक्षास्तदादेशाद्यथेष्टगतयोऽभवन् ।।[19]

मृगाः अश्रमस्य शोभां वर्द्धयन्ति । अतः वशिष्ठऋषेः पर्णकुटीरस्य प्राङ्गणे मृगाः रोमन्थमकुर्वन् । अतः कालिदासेन प्रोक्तम् –

आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।

मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ।।[20]

वशिष्ठस्य आश्रमे दिलीपः रथादवतरणं कृत्वा धुर्यान् विश्रामयेति सारथिमादिश्य सुदक्षिणां रथादवततार । दिलीपस्य 'धुर्यान् विश्रामय' वाक्यात् प्राणिनं प्रति तस्यानुरागः दरीदृश्यते । यथोक्तं -

अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।

तामवारोहयत्पत्नीं रथादवततार च ।।[21]

सूर्यवंशस्य यशस्वी राजा दिलीपः स्वप्राणविनिमयेन नन्दिन्याः रक्षणं कर्तुमिष्टवान् । यथोक्तं-

निवर्त्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।

पयोधरीभूतचतुःसमुद्रां जुगोप गोरुपधरामिवोर्वीम् ।।[22]

यदि राज्यस्य शासकः समर्थः न्याययुक्तश्च भविष्यति तर्हि तस्य राज्ये दुर्बलप्राणिनः सुखेन कालं यापयन्ति । दिलीपस्य वनप्रवेशं दृष्ट्वा व्याघ्रसिंहादयः सबलप्राणिनः दुर्बलं हरिण्यादिकं न बबाधे । अतः रघुवंशे वर्णितमस्ति –

शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।

ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वने गोप्तरि गाहमाने ।।[23]

राजा दिलीपः स्वादयुक्तैः तृणानां कवलैः, कण्डूयनैः, वनमक्षिकाणां निवारणैः. अप्रतिहतैः स्वच्छन्दगमनैश्च धेन्वाः नन्दिन्याः समाराधनतत्परोऽभूत् । यथोक्तं –

आस्वाद्वदभिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।

अव्याहतैः स्वैरगतैः स तस्या सम्राट् समाराधनतत्परोऽभूत् ।।[24]

कालिदास विहंगान् प्रति प्रेमभावं प्रकट्योक्तवान् –

सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।

विश्वासाय विहंगानामालवालाम्बुपायिनाम् ।।[25]

अर्थात् वृक्षाणां सेचनादनन्तरं मुनिकन्याः तस्मात् स्थानादन्यत्र गतवत्यः येन विहगाः निर्भयेन जलं पास्यन्ति । विहंगानां जलग्रहणे बाधा न भवेदिति चिन्तयित्वा ताः तत्र न स्थित्वा अन्यत्र गतवत्यः । प्राणिनां संरक्षणं कथं क्रियते इति दिलीपस्य गोसेवात् ज्ञायते । दिलीप छायेव नन्दिन्याः अनुसरणं कृतवान् । यथोक्तं-

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।

जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ।।[26]

रघुवंशस्य द्वितीयसर्गे दिलीपस्य वचनादनुमीयते यत् प्राणिनं प्रति तस्य हृदये श्रद्धा आसीत् । पादपादरभ्य मनुष्यादीनामुत्पत्ति-स्थिति-नाशादीनां हेतुः ईश्वरः शङ्करः मम पूज्यः भवति । तस्य आदेशस्योल्लंघनं कदापि न क्रियते । परन्तु गुरोः वशिष्ठस्य धनमर्थात् नन्दिनीमपि अनुपेक्षणीयम् । अतः नन्दिन्याः रक्षणं मम प्रधानकर्तव्यं भवतीति दिलीपेनोक्तम् । यथोक्तं रघुवंशे –

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।

गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्थादनुपेक्षणीयम् ।।[27]

प्राणिनः संरक्षणं मनुष्यैः करणीयम् । अतः यदि मनुष्यः तस्य कार्यं सफलतया न करोति तर्हि सः स्वप्रतिष्ठां स्वहस्ते एव नाशयति । रघुवंशे राज्ञः दिलीपस्य चरित्रमाध्यमेन महाकविः कालिदासः इमां शिक्षां मनुष्याय ददाति । अतः कालिदासेन प्रोक्तम् –

भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ।

स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ।।[28]

मेघदूते जैवसंरक्षणम्

मेघदूते देवदारुद्रुमाणां शाखासंघर्षात् समुत्पन्नोल्काभिः स्फुलिङ्गैः दग्धीभूतः चमरीमृगाणां वालभारः दवाग्निः यदि हिमालयं पीडयेत् तर्हि मेघः अजस्रवारिवृष्ट्या निर्वापयितुं समर्थः स्यात् । अतः यक्षेण प्रोक्तम् –

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा

बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।

अर्हस्येनं शमयितुमलं वारिधारासहस्रै –

रापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।।[29]

अत्र चमरीमृगाणां शरीरं मेघकृतवारिवृष्टिमाध्यमेन तापशून्यमभवदिति कालिदासेन परोक्षोक्तिः ।

पूर्वमेघे पार्वती पुत्रप्रेम्णा मयूरस्य शरीरात् निपतितं पिच्छं नीलोत्पलमण्डनयोग्ये कर्णे धारयति । यथोक्तं मेघदूते –

ज्योतिर्लेखावलयि गलितं यस्य वर्हं भवानी

पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।[30]

अत्र मयुरस्य शरीरात् बलप्रयोगं कृत्वा पिच्छस्य ग्रहणं न भवति अपितु स्वतः निपतितं पिच्छं पार्वती गृहीतवती ।

आचार्यमनुमतानुसारेण देवेभ्यः, दिवाचरेभ्यः नक्तञ्चारिभ्योः भूतेभ्यो बलिमुत्क्षिपेत् । अतः उच्यते –

विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत् ।
दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्यः एव च ।।[31]

बलिः जीवानामर्थे दीयते अतः पक्षिणः अपरनाम 'गृहबलिभुक्' इति मेघदूते कालिदासेन प्रोक्तम् –

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिर्न्नै –
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।।[32]

अभिज्ञानशाकुन्तले जैवसंरक्षणम्

अभिज्ञानशाकुन्तले यदा दुष्यन्तः कृष्णसारमृगस्योपरि शरप्रहारं कर्त्तुमुद्यतः अभवत् तदा वैखानसः उक्तवान् – **राजन् ! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः –**

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्

मृदुनि मृगशरीरे तूलराशाविवाग्निः ।

क्व वत हरिणकानां जीवितं चातिलोलं

क्व च निशितनिपाता वज्रसाराः शरास्ते ।।[33]

अपिच –

तदाशु कृतसन्धानं प्रतिसंहर सायकम् ।

आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ।।[34]

अर्थात हे राजन् ! अस्मिन् कोमले मृगशरीरे कार्पासपुञ्जे अग्निरिव तव बाणः न खलु न खलु प्रहरणीयः । बालमृगाणामतिसुकुमारं जीवनं क्व ! तीक्ष्णप्रहाराः वज्रवत्कठोराः तव बाणाश्च कुत्र ! अतः धनुष्यारोपितं बाणं सत्त्वरं प्रतिसंहर । यतः युष्माकं शस्त्रं विपन्नप्रतिपालनाय भवति न तु निरपाराधस्य मृगस्य प्राणनाशार्थं भवति । अतः निरपराधिनमेनं मृगं मुञ्चेत् ।

अभिज्ञानशाकुन्तले शकुन्तलायाः पतिगृहगमनकाले मृगशावकः तस्याः अनुसरणं कृतवान् । यतः मृगस्य व्रणोपचारं शकुन्तला स्वीयहस्तेन कृतवती । अतः कण्वमुनिना प्रोक्तम् –

यस्य त्वया व्रणविरोपणमिङ्गुदीनां

तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।

श्यामाकमुष्टिपरिवर्द्धितको जहाति

सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ।।[35]

अर्थात् शकुन्तला दर्भसूचिक्षते मृगस्य वदनाभ्यन्तरे क्षतशोधकस्य इङ्गुदीवृक्षस्य स्नेहस्य सेचनं कृत्वा तस्य व्रणोपचारं कृतवती । अतः मृगः तस्याः अनुसरणं कृतवान् ।

अभिज्ञानशाकुन्तलस्य द्वितीयेऽङ्के यदा दुष्यन्तस्य सेनापतिः दृष्यन्तं मृगया कर्तुं प्रेरयित्वा उक्तवान् –

मेदश्छेदकृशोदरं लघु भवत्युत्साहयोग्यं वपुः

सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।

उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले

मिथ्या हि व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ।।[36]

एतच्छ्रुत्वा दुष्यन्तः आखेटककार्यात् विरामं नेतुं कथयति 'भद्र सेनापते ! मुनीनां तपोवनसन्निधौ अहं स्थितोऽस्मि । अतः तव वचनं न स्वीकरोमि अर्थात् सम्प्रति अहं मृगयां नेच्छामीति । पुनः दुष्यन्तेनोक्तम् –

गाहन्तां महिषां निपानसलिलं शृङ्गैर्मुहुस्ताडितं

छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।

विश्रब्धैः क्रियतां बराहपतिभिर्मुस्ताक्षतिः पल्वले

विश्रामं लभतामिदञ्च शिथिलज्यावन्धमस्मद्धनुः ।।[37]

अर्थात् महिषाः स्वविषाणैः मुहुः उत्फालितं निपानसलिलं आलोडयन्तु अर्थात् जले निर्भयत्वात् यथेच्छं क्रीडन्तु । हरिणसमूहं छायासु मण्डलाकारेणावस्थानं कृत्वा रोमन्थमभ्यस्यतु । सुकरश्रेष्ठैः निःशङ्कं जलगर्त्ते मुस्ताखननं विधीयताम् । अतः सम्प्रति मम धनुः विश्रामं प्राप्नोतु । यतः राज्ञः धर्मः भवति तपोवनस्य रक्षणम् । तपोवने निवसतां ऋषीणां, प्राणिनाञ्च रक्षणं राज्ञः प्रधानकर्तव्यमिति ।

राजा दुष्यन्तः यदा कण्वाश्रमे प्रवेष्टुं निश्चयं कृतवान् तदा सः वाजिनः शीतलोपचारं कर्तुं सूतमादिशति –

'राजा यावदाश्रमवासिनः प्रत्यवेक्ष निवर्तिष्ये , तावदार्द्रपृष्ठाः क्रियन्तां वजिनः'[38] ।

यः सर्वभूतेभ्यः अभयं प्रददाति सः तेजोमयलोकं प्राप्नोति । अतः आचार्यमनुना प्रोक्तम् –

यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।

तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ।।[39]

अचार्य मनुमहोदयानुसारं यदि कोऽपि पशून् पिडयति तर्हि तस्य कृते दण्डव्यवस्या करणीया । येन पशवः स्वच्छेया जीवनधारणं कुर्वन्ति । यथोक्तं मनुस्मृतौ -

मनुष्याणां पशूनां च दुःखाय प्रहृते सति ।

यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा ।।[40]

अपिच –

चर्मचार्मिकभाण्डेषु काष्ठलोष्टमयेषु च ।

मूल्यात्पञ्चगुणो दण्डः पुष्पमूलफलेषु च ।।[41]

प्राणिहननं पापस्य कारणम् । विना कारणेन पशोः हननं न कुर्यात् । य़थोक्तं आचार्यमनुना -

कृर्याद्घृतपशुं सङ्गे कुर्यात्पिष्टपशुं तथा ।

न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ।।[42]

निष्कर्षः

प्राचीनकाले जनाः गां 'गोमाता' इति विचार्य पूजयन्ति । परन्तु अधुना मानवैः गावः तिरस्क्रियन्ते । मनुष्यः प्राणिनां हननं कृत्वा स्वपाशविकप्रवृत्तेः परिचयं ददाति । येन वन्यजीवानां संख्याह्रासः अधुना दरीद्दश्यते । अस्माकं देशे अभ्यारण्य-राष्ट्रियोद्यानानि सन्ति परन्तु तत्र वन्यजीवाः तादृशपरिमाणेन न सन्ति । वन्यप्राणिनां सुरक्षायै भारतसर्वकारपक्षतः योजना परिकील्पिता । यथा- 'Musk Deer Project', 'Project Hangul', 'Turtle Conservation Project', 'MIKE' (Monitoring the Illegal Killing of Elephants), 'Tiger Project', 'Elephant conservation Project', 'Crocodile Conservation Project', 'Vulture Conservation Project', 'Red Panda Project', 'Rhino Project', 'Snow Leopard Project', 'Dolphin Conservation in Ganges River'. प्राणिनं विना मानवस्यास्थित्वं परिकल्पनं कर्तुं न शक्यते । चरकसंहितानुसारं गो-अजा-खर-उष्ट्रप्रभृतीनां प्राणिनां मूत्रेण रोगस्य चिकित्सा क्रियते । जीवानां मलमूत्रव्यवहारेण भूमेरुर्वरशक्तिं वर्द्धते । पक्षिभिः वृक्षाणां वीजवितरणं भूयते । एवंरुपेण पर्यावरणसन्तुलने प्राणिनां योगदानं वर्तते । अतः तेषां हननं नापितु संरक्षणमस्माकं कर्तव्यम् ।

---

1. स्वाईँ, डॉ. व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार,पुरी, ओडिशा, पृ.सं- ५८
2. तत्रैव, पृ.सं- ७६
3. त्रिपाठी, डॉ. श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ.सं- ४८६
4. त्रिपाठी, डॉ. रमाकान्त : महाकविभवभूतिप्रणीतं उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ.सं- ९०
5. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, पृ.सं- ५२४
6. त्रिपाठी, डॉ. श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ.सं- ३४
7. तत्रैव, पृ. सं-३४
8. तत्रैव, पृ. सं-३५
9. तत्रैव, पृ. सं-३५
10. तत्रैव, पृ. सं-४३
11. तत्रैव, पृ. सं-६१

12. तत्रैव, पृ.सं-३०२
13. तत्रैव, पृ.सं-३०३
14. तत्रैव, पृ.सं-३०७
15. तत्रैव, पृ.सं-५८६
16. तत्रैव, पृ.सं-३१४
17. स्वाईं, डॉ. व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार,पुरी, ओडिशा, पृ.सं- २४२
18. त्रिपाठी, डॉ. श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ.सं-५७१
19. तत्रैव, पृ.सं- ५७२
20. तत्रैव, पृ.सं-२४
21. तत्रैव, पृ.सं-२५
22. तत्रैव, पृ.सं-४३
23. तत्रैव, पृ.सं-४८
24. तत्रैव, पृ.सं-४४
25. तत्रैव, पृ.सं-२४
26. तत्रैव, पृ.सं-४५
27. तत्रैव, पृ.सं-६१
28. तत्रैव, पृ.सं-६६
29. मिश्र, डॉ. व्रजसुन्दर (१९९९): मेघदूत, विद्यापुरी, वालुबाजार, कटक, ओडिशा, पृ.सं- २७९
30. तत्रैव, पृ.सं- २३७
31. स्वाईं, डॉ. व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार,पुरी, ओडिशा, पृ.सं- १३८
32. मिश्र, डॉ. व्रजसुन्दर (१९९९): मेघदूत, विद्यापुरी, वालुबाजार, कटक, ओडिशा, पृ.सं- १४६
33. राय, डॉ. गङ्गासागर (वि.सं.२०६५) : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थावाराणसी , पृ.सं-२०
34. तत्रैव, पृ.सं-२१
35. तत्रैव, पृ.सं-२०१
36. तत्रैव, पृ.सं-८१
37. तत्रैव, पृ.सं-८३
38. तत्रैव, पृ.सं-२७
39. स्वाईं, डॉ. व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार,पुरी, ओडिशा, पृ.सं- २८२
40. तत्रैव, पृ.सं-४२३
41. तत्रैव, पृ.सं-४२४
42. तत्रैव, पृ.सं-२४०

संदर्भ ग्रंथ सूची:

1. अमरसिंह-प्रणीतःअमरकोषः संक्षिप्त माहेश्वरी टीका सहित, दशम संस्करण, निर्णय सागर प्रकाशन, मुम्बई, १९६९ ई०
2. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, २७३००५
3. त्रिपाठी, डॉ. रमाकान्त : महाकविभवभूतिप्रणीतं उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३
4. त्रिपाठी, डॉ. श्रीकृष्णमिश्रः : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२
5. मिश्र, डॉ. व्रजसुन्दर: मेघदूत, विद्यापुरी, वालुबाजार, कटक, ओडिशा, १९९९
6. राय, डॉ. गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत, संस्थान, वाराणसी, वि.सं.२०६५